# National Anthem of the Global Country of World Peace

# ऋग्वेदः

Rik Ved 10.191 & 10.173.4-5

संस॒मिद्यु॑वसे वृष॒न्नग्ने॒ विश्वा॑न्य॒र्य आ
इ॒ळस्प॒दे समि॒ध्यसे॒ स नो॒ वसू॒न्या भ॑र ॥ १
सं ग॑च्छध्वं॒ सं व॑दध्वं॒ सं वो॒ मनां॑सि जानताम्
दे॒वा भा॒गं॑ यथा॒ पूर्वे॑ संजाना॒ना उ॒पासते ॥ २
स॒मा॒नो मन्त्रः॒ समि॑तिः सम॒ानी स॑मानं मनः॑ स॒ह चि॒त्तमे॑षाम्
स॒मा॒नं मन्त्र॑म॒भि म॑न्त्रये वः समा॒नेन वो ह॒विषा॑ जु॒होमि ॥ ३
स॒मा॒नी व॒ आकू॑तिः समा॒ना हृद॑यानि वः
स॒मा॒नम॑स्तु वो॒ मनो॒ यथा॑ वः॒ सु॒स॒हास॑ति ॥ ४

ध्रु॒वा द्यौर्ध्रु॒वा पृ॑थि॒वी ध्रु॒वासः॒ पर्व॑ता इ॒मे
ध्रु॒वं विश्व॑मि॒दं जग॑द् ध्रु॒वो राजा॑ वि॒शाम॒यम् ॥ ४
ध्रु॒वं ते॒ राजा॒ वरु॑णो ध्रु॒वं दे॒वो बृह॒स्पतिः॑
ध्रु॒वं त॒ इन्द्र॑श्चा॒ग्निश्च॑ रा॒ष्ट्रं धा॑रयतां ध्रु॒वम् ॥ ५

# कृष्ण यजुर्वेदः

Taittirīya Brāhman Ashtak 3 Prapāthak 9
Anuvāk 7, Varga 1, Varga 2 (4 sentences)

अप॒ वा ए॒तस्मा॒च्छ्री रा॒ष्ट्रं क्रा॑मति । योऽश्वमे॒धेन॒ यज॑ते ।
ऊ॒र्ध्वामे॑ना॒मु॒च्छ्र॑यता॒दित्या॑ह । श्रीर्वै रा॒ष्ट्रम॑श्वमे॒धः ।
श्रिय॑मे॒वास्मै॑ रा॒ष्ट्रमू॒र्ध्वमुच्छ्र॑यति । वे॒णुभा॒रं गि॒राव॒िवेत्या॑ह ।
रा॒ष्ट्रं वै भा॒रः । रा॒ष्ट्रमे॒वास्मै॒ पर्यू॑हति ।
अथा॑स्या॒ मध्य॑मेधता॒मित्या॑ह । श्रीर्वै रा॒ष्ट्रस्य॒ मध्य॑म् ।
श्रिय॑मे॒वाव॑रुन्धे । शी॒ते वाते॑ पु॒नन्नि॒वेत्या॑ह । क्षेमो॒ वै रा॒ष्ट्रस्य॑ शी॒तो वातः॑ ।
क्षेम॑मे॒वाव॑रुन्धे ।

# शुक्लयजुर्वेद

Shukla Yajur Veda 10.2-4

वृष्णऽऊर्मिरसि राष्ट्रदा राष्ट्रम्मे देहि स्वाहा वृष्णऽऊर्मिरसि राष्ट्रदा राष्ट्रममुष्मै
देहि वृषसेनोसि राष्ट्रदा राष्ट्रम्मे देहि स्वाहा
वृषसेनोसि राष्ट्रदा राष्ट्रममुष्मै देह्यर्थेत स्थ २

अर्थेत स्थ राष्ट्रदा राष्ट्रम्मे दत्त स्वाहार्थेत स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तौजस्वती स्थ
राष्ट्रदा राष्ट्रम्मे दत्त स्वाहौजस्वती स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तापः परिवाहिणी
स्थ राष्ट्रदा राष्ट्रम्मे दत्त स्वाहापः परिवाहिणी स्थ राष्ट्रदा राष्ट्रममुष्मै
दत्तापाम्पतिरसि राष्ट्रदा राष्ट्रम्मे देहि स्वाहापाम्पतिरसि राष्ट्रदा राष्ट्रममुष्मै
देह्यपाङ्गर्भोसि राष्ट्रदा राष्ट्रम्मे देहि स्वाहापाङ्गर्भोसि राष्ट्रदा राष्ट्रममुष्मै देहि
सूर्यत्वचस स्थ ३

सूर्यत्वचस स्थ राष्ट्रदा राष्ट्रम्मे दत्त स्वाहा सूर्यत्वचस स्थ राष्ट्रदा राष्ट्रममुष्मै
दत्त सूर्यवर्चस स्थ राष्ट्रदा राष्ट्रम्मे दत्त स्वाहा सूर्यवर्चस स्थ राष्ट्रदा
राष्ट्रममुष्मै दत्त मान्दा स्थ राष्ट्रदा राष्ट्रम्मे दत्त स्वाहा मान्दा स्थ राष्ट्रदा
राष्ट्रममुष्मै दत्त व्रजक्षित स्थ राष्ट्रदा राष्ट्रम्मे दत्त स्वाहा व्रजक्षित स्थ राष्ट्रदा
राष्ट्रममुष्मै दत्त वाशा स्थ राष्ट्रदा राष्ट्रम्मे दत्त स्वाहा वाशा स्थ राष्ट्रदा
राष्ट्रममुष्मै दत्त शविष्ठा स्थ राष्ट्रदा राष्ट्रम्मे दत्त स्वाहा शविष्ठा स्थ राष्ट्रदा
राष्ट्रममुष्मै दत्त शक्वरी स्थ राष्ट्रदा राष्ट्रम्मे दत्त स्वाहा
शक्वरी स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त जनभृत स्थ राष्ट्रदा राष्ट्रम्मे दत्त स्वाहा
जनभृत स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त विश्वभृत स्थ राष्ट्रदा राष्ट्रम्मे दत्त स्वाहा
विश्वभृत स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तापः स्वराज स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ।
मधुमतीर्मधुमतीभिः पृच्यन्ताम्महि क्षत्रङ्क्षत्रियाय वन्वानाऽअनाधृष्टाः सीदत
सहौजसो महि क्षत्रङ्क्षत्रियाय दधतीः ४

National Anthem of the Global Country of World Peace

# अथर्ववेदः

Kānd 19.41

भद्रमिच्छन्त ऋषयः स्वर्विदस्तपो दीक्षामुपनिषेदुरग्रे ।
ततो राष्ट्रं बलमोजश्च जातं तदस्मै देवा उपसंनमन्तु १

Kānd 3.30

सहृदयं सांमनस्यमविद्वेषं कृणोमि वः
अन्यो अन्यमभि हर्यत वत्सं जातामिवाघ्न्या १
अनुव्रतः पितुः पुत्रो मात्रा भवतु संमनाः
जाया पत्ये मधुमतीं वाचं वदतु शान्तिवाम् २
मा भ्राता भ्रातरं द्विक्षन्मा स्वसारमुत स्वसा
सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया ३
येन देवा न वियन्ति नो च विद्विषते मिथः
तत्कृण्मो ब्रह्म वो गृहे संज्ञानं पुरुषेभ्यः ४
ज्यायस्वन्तश्चित्तिनो मा वि यौष्ट संराधयन्तः सधुराश्चरन्तः
अन्यो अन्यस्मै वल्गु वदन्त एत सध्रीचीनान्वः संमनसस्कृणोमि ५
समानी प्रपा सह वोन्नभागः समाने योक्त्रे सह वो युनज्मि
सम्यञ्चोग्निं सपर्यतारा नाभिमिवाभितः ६
सध्रीचीनान्वः संमनसस्कृणोम्येकश्नुष्टीन्त्संवननेन सर्वान्
देवा इवामृतं रक्षमाणाः सायंप्रातः सौमनसो वो अस्तु ७